# कनकधारा स्तोत्रम्

अङ्गं हरेः पुलक भूषण माश्रयन्ती
भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ।
अङ्गीकृताखिल विभूति रपाङ्गलीला
माङ्गल्यदास्तु मम मङ्गल देवतायाः ॥ 1 ॥

मुग्धा मुहुर् विदधती वदने मुरारेः
प्रेमत्रपा प्रणिहितानि गतागतानि ।
मालादृशोर् मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागर सम्भवा याः ॥ 2 ॥

आमीलिताक्ष मधिगम्य मुदा मुकुन्दम्
आनन्द कन्द मनिमेष मनङ्ग तन्त्रं ।
आकेकर स्थित कनीनिक पक्ष्म नेत्रं
भूत्यै भवेन मम भुजङ्ग शयाङ्गना याः ॥ 3 ॥

बाह्वन्तरे मधुजितः श्रित कौस्तुभे या
हारावलीव हरिनीलमयी विभाति ।
कामप्रदा भगवतोऽपि कटाक्ष माला
कल्याण मावहतु मे कमलालया याः ॥ 4 ॥

कालाम्बुदालि ललितो रसि कैट भारेः
धाराधरे स्फुरति या तटिदङ्गनेव ।
मातुस्समस्त जगतां महनीय मूर्तिः

भद्राणि मे दिशतु भार्ग वनन्दना याः ॥ 5 ॥

प्राप्तं पदं प्रथमतः खलु यत् प्रभावात्
माङ्गल्य भाजि मधु माथिनि मन्मथेन ।
मय्या पतेत्त दिह मन्थर मीक्षणार्थं
मन्दालसं च मकरालय कन्यका याः ॥ 6 ॥

विश्वामरेन्द्र पद विभ्रम दान दक्षम्
आनन्द हेतु रधिकं मुरविद् विषोऽपि ।
ईषन्निषीदतु मयि क्षण मीक्षणार्थं
इन्दीवरोदर सहोदर मिन्दिरायाः ॥ 7 ॥

इष्टा विशिष्ट मतयोपि यया दयार्द्र
दृष्ट्या त्रिविष्टप पदं सुलभं लभन्ते ।
दृष्टिः प्रहृष्ट कमलोदर दीप्तिरिष्टां
पुष्टिं कृषीष्ट मम पुष्कर विष्टरा याः ॥ 8 ॥

दद्याद्दयानु पवनो द्रविणाम्बु धारां
अस्मिन् नकिञ्चन विहङ्ग शिशौ विषण्णे ।
दुष्कर्म घर्म मपनीय चिराय दूरं
नारायण प्रणयिनी नयनाम्बु वाहः ॥ 9 ॥

गीर्देवतेति गरुड ध्वज सुन्दरीति
शाकम्बरीति शशि शेखर वल्लभेति ।

सृष्टि स्थिति प्रलय केलिषु संस्थितायै
तस्यै नमस् त्रिभुवनैक गुरो स्तरुण्यै ॥ 10 ॥

श्रुत्यै नमोऽस्तु शुभकर्म फलप्रसूत्यै
रत्यै नमोऽस्तु रमणीय गुणार्णवायै ।
शक्त्यै नमोऽस्तु शतपत्र निकेतनायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तम वल्लभायै ॥ 11 ॥

नमोऽस्तु नालीक निभाननायै
नमोऽस्तु दुग्धोदधि जन्म भूम्यै ।
नमोऽस्तु सोमामृत सोदरायै
नमोऽस्तु नारायण वल्लभायै ॥ 12 ॥

नमोऽस्तु हेमाम्बुज पीठिकायै
नमोऽस्तु भूमण्डल नायिकायै ।
नमोऽस्तु देवादि दयापरायै
नमोऽस्तु शार्ङ्गायुध वल्लभायै ॥ 13 ॥

नमोऽस्तु देव्यै भृगुनन्दनायै
नमोऽस्तु विष्णो रुरसि स्थितायै ।
नमोऽस्तु लक्ष्म्यै कमलालयायै
नमोऽस्तु दामोदर वल्लभायै ॥ 14 ॥

नमोऽस्तु कान्त्यै कमलेक्षणायै
नमोऽस्तु भूत्यै भुवन प्रसूत्यै ।

नमोऽस्तु देवादिभि रर्चितायै
नमोऽस्तु नन्दात्मज वल्लभायै ॥ 15 ॥

सम्पत् कराणि सकलेन्द्रिय नन्दनानि
साम्राज्य दान विभवानि सरोरु हाक्षि ।
त्वद्वन्दनानि दुरिता हरणोद्य तानि
मामेव मात रनिशं कलयन्तु मान्ये ॥ 16 ॥

यत्कटाक्ष समुपासना विधिः
सेवकस्य सकलार्थ सम्पदः ।
सन्तनोति वचनाङ्ग मानसैः
त्वां मुरारि हृदयेश्वरीं भजे ॥ 17 ॥

सरसिज निलये सरोज हस्ते
धवल तमांशुक गन्धमाल्य शोभे ।
भगवति हरिवल्लभे मनोज्ञे
त्रिभुवन भूतिकरी प्रसीद मह्यं ॥ 18 ॥

दिग्घस्तिभिः कनक कुम्भ मुखाव सृष्ट
स्वर्वाहिनी विमलचारु जला प्लुताङ्गीम् ।
प्रात र्नमामि जगतां जननी मशेष
लोकाधि नाथ गृहिणीम् अमृताब्धि पुत्रीं ॥ 19 ॥

कमले कमलाक्ष वल्लभे त्वं
करुणापूर तरङ्गितै रपाङ्गैः ।

अवलोकय मा मकिञ्चनानां
प्रथमं पात्र मकृतिमं दयायाः ॥ 20 ॥

स्तुवन्ति ये स्तुतिभिर् अमीभिरन्वहं
त्रयीमयीं त्रिभुवन मातरं रमां ।
गुणाधिका गुरुतुर भाग्य भागिनो
भवन्ति ते भुवि बुध भाविताशयाः ॥ 21 ॥

इति श्रीमद् शङ्कराचार्यकृत श्री कनकधारास्तोत्रं सम्पूर्णम्